# अवधूतगीता

अवधूतः श्रीदत्तात्रेयः



णमोत्थु णं समणस्स भगवओ महावीरस्स

શ્રીપ્રેમ-ભુવનભાનુ-પદ્મ-જયઘોષસૂરિસદ્ગુરુભ્યો નમઃ

શ્રી ભુવનભાનુસૂરિ જન્મશતાબ્દીએ નવલું નજરાણું-૬૧

नवनिर्मित-अवधूतोपनिषद्-व्याख्यालङ्कृता

श्रीदत्तात्रेयावधूतप्रणीता

# अवधूतगीता

: नूतनसंस्कृतवृत्तिसर्जनम्+सम्पादनम् :

प्राचीनश्रुतोद्धारक प.पू. आचार्यदेव-श्रीमद्विजय**हेमचन्द्रसूरीश्वराणां** शिष्या

आचार्यविजय**कल्याणबोधिसूरीश्वराः**

અવધૂતગીતાની કેટલીક
મનનીય સૂક્તિઓ પર
આધ્યાત્મિક પ્રકાશ

: प्रकाशक :

श्री जिनशासन आराधना ट्रस्ट

- મૂળ કૃતિ : અવધૂતગીતા (૨૮૯ સંસ્કૃત શ્લોક)
- મૂળ કૃતિકાર : શ્રી દત્તાત્રેય અવધૂત
- નવનિર્મિત કતિપય શ્લોક વૃત્તિ : અવધૂતોપનિષદ્
- સંસ્કૃતવૃત્તિનવસર્જન+સંપાદન : પ્રાચીન શ્રુતોદ્ધારક પ.પૂ. આચાર્યદેવ શ્રીમદ્વિજય **હેમચન્દ્રસૂરીશ્વરજી મહારાજા** ના શિષ્ય પ.પૂ. આચાર્યદેવ શ્રીમદ્વિજય **કલ્યાણબોધિસૂરીશ્વરજી મહારાજ**.
- વિષય : અધ્યાત્મ, વૈરાગ્ય, બ્રહ્મચર્ય આદિ.
- વિશેષતા : શાંતિ-સમાધિ-પ્રસન્નતા માટે, જ્ઞાનનયની અદ્ભુત ભૂમિકા પર સંચરણ કરવા માટે, વિશુદ્ધ બ્રહ્મચર્યની અનુભૂતિ માટે પરિશીલનીય પ્રબંધ.
- પઠન-પાઠનના અધિકારી : ગીતાર્થગુરુ અનુજ્ઞાત શ્રુત-વયથી પરિણત આત્મા.


- વિ. સં. ૨૦૬૭ • પ્રથમ આવૃત્તિ • પ્રતિ : ૫૦૦
- **આવૃત્તિ :** પ્રથમ • **મૂલ્ય :** રૂા. ૧૦૦

આ પુસ્તક જ્ઞાનદ્રવ્યથી પ્રકાશિત થયું છે. માટે ગૃહસ્થે મૂલ્ય ચૂકવીને માલિકી કરવી.

- **પ્રકાશક :** શ્રી જિનશાસન આરાધના ટ્રસ્ટ

E-mail : jinshasan108@gmail.com



© શ્રી જિનશાસન આરાધના ટ્રસ્ટ. આ પુસ્તકના કોઈપણ અંશનો ઉપયોગ કરતા પૂર્વે લેખક તથા પ્રકાશકની લેખિત મંજૂરી મેળવવી જરૂરી છે.

Copyright held by Shree Jinshasan Aradhana Trust under Indian Copyright Act, 1957. http://copyright.gov.in/documents/copyright rules 1957, pdf.

Note : Unauthorised usage, whether uploading on any website or printing in a book or forwarding to others on the internet or putting up on a blog is prohibited. Reproduction of this text by any means whether in part or in full, cannot be made unless express written consent obtained from shree Jinshasan Aradhana Trust. Any violation of this shall be deemed a violation of the intellectual rights of the publisher & of the copyright act, 1957.



- **આ ગ્રંથના મૂલાધાર છે - મુનિ જિનપ્રેમવિજયજી મ.સા.** અને અનન્ય સહયોગી છે **મુનિ ભાવપ્રેમવિજયજી મ.સા., મુનિ રાજપ્રેમવિજયજી મ.સા.**

---

**મુદ્રક : ભરત ગ્રાફિક્સ,** ન્યુ માર્કેટ, પાંજરાપોળ, રિલીફ રોડ, અમદાવાદ-૧.
Ph. : 079-22134176, M : 9925020106, E-mail : bharatgraphics1@gmail.com



चरमतीर्थपतिः करुणासागरः श्रीमहावीरस्वामी



अनन्तलब्धिनिधानः श्रीगौतमस्वामी



पञ्चमगणधरः श्रीसुधर्मास्वामी

# કૃપા વરસે અનરાધાર

સિદ્ધાંતમહોદધિ સુવિશાલગચ્છસર્જક પ. પૂ. આચાર્યદેવ

**શ્રીમદ્વિજય પ્રેમસૂરીશ્વરજી મહારાજા**

વર્ધમાન તપોનિધિ ન્યાયવિશારદ પ. પૂ. આચાર્યદેવ

**શ્રીમદ્વિજય ભુવનભાનુસૂરીશ્વરજી મહારાજા**

અજોડ ગુરુસમર્પિત ગુણગણનિધિ પ.પૂ. પંન્યાસપ્રવર

**શ્રી પદ્મવિજયજી ગણિવર્ય**

વૈરાગ્યદેશનાદક્ષ પ.પૂ. આચાર્યદેવ

**શ્રીમદ્વિજય હેમચન્દ્રસૂરીશ્વરજી મહારાજા**

# સુકૃત સહયોગી

અભિનંદન... ધન્યવાદ... અનુમોદના... અભિનંદન... અભિનંદન... અભિનંદન... ધન્યવાદ... અનુમોદના...

## શ્રી જૈન શ્વેતાંબર મૂર્તિપૂજક સંઘ

### જલગાઁવ

**પ્રેરક : પૂ.પં. શ્રી શિવસુંદરવિજયજી ગણિ**

**જ્ઞાનનિધિના સદ્‌વિનિયોગ બદલ**
**શ્રીસંઘ તથા ટ્રસ્ટીઓની**
**ભૂરિ ભૂરિ અનુમોદના**

**પ્રાપ્તિસ્થાન : શ્રી જિનશાસન આરાધના ટ્રસ્ટ**

**મુંબઈ :** શ્રી ચંદ્રકુમારભાઈ બી. જરીવાલા,
દુ.નં. ૬, બદ્રીકેશ્વર સોસાયટી,
મરીન ડ્રાઈવ 'ઈ' રોડ,
નેતાજી સુભાષ માર્ગ, મુંબઈ.
ફોન : ૨૨૮૧૮૩૯૦

શ્રી અક્ષયભાઈ જે. શાહ
૫૦૬, પદ્‌મએપાર્ટમેન્ટ,
જૈન દેરાસરની સામે, સર્વોદયનગર
મુલુંડ (વે.) મુંબઈ-૪૦૦૦૮૦.
ફોન : ૨૫૬૭૪૭૮૦

**પાટણ :** શ્રી ચંદ્રકાંતભાઈ એસ. સંઘવી
૬-બી, અશોકા કોમ્પલેક્ષ,
પહેલા રેલવે ગરનાળા પાસે, પાટણ,
ઉ.ગુ. ફોન : ૯૯૦૯૪ ૬૮૫૭૨

**અમદાવાદ :** શ્રી બાબુભાઈ સરેમલજી બેડાવાળા
સિદ્ધાચલ બંગલોઝ, સેન્ટ એન. સ્કુલ પાસે,
હીરા જૈન સોસાયટી, સાબરમતી,
અમદાવાદ-૫.
ફોન : ૨૭૫૦૫૭૨૦, ૨૨૧૩૨૫૪૩

# પ્રકાશકીય

દત્તાત્રેય અવધૂત પ્રણીત અવધૂત ગીતા અધ્યાત્મનો એક ગહન ગ્રંથ છે. અધ્યાત્મરસિક આત્માઓને આનંદ આપનારા આ ગ્રન્થરત્નની કેટલીક મનનીય સૂક્તિઓ પર પૂ.આ. શ્રી **કલ્યાણબોધિસૂરીશ્વરજી મ.સા.**એ સંસ્કૃત ટીકાની સુંદર શૈલીમાં રચના કરી છે.

અધ્યાત્મરસિક આત્માઓને સ્વાધ્યાયમાં સહાયભૂત બનનારા આ ગ્રન્થરત્નનું પ્રકાશન કરવાની સુંદર તક અમોને સાંપડી છે તે બદલ પૂ.આ.ભ.શ્રીના અમો ઋણી છીએ.

પૂ.આ. **શ્રી હેમચંદ્રસૂરીશ્વરજી મ.સા.**ના આશિષ અને પ્રેરણાથી છેલ્લા ૩૫ વર્ષથી શ્રુતભક્તિના કાર્યમાં જોડાઈ જિનશાસનની સેવાનો લાભ પ્રાપ્ત થઈ રહ્યો છે. ભવિષ્યમાં પણ આવા સુંદર કાર્યો કરવાની તક અમને પ્રાપ્ત થયા કરે એ જ શ્રુતાધિષ્ઠાયિકા સરસ્વતી દેવીને પ્રાર્થના સહ...

લિ.
ચન્દ્રકુમાર જરીવાલા,
લલિતભાઈ કોઠારી,
પુંડરીકભાઈ શાહ
વિનયચંદ્ર કોઠારી

અવધૂતગીતા

# ઝલક

- ज्ञानामृतं शुद्धमतीन्द्रियोऽहम् ॥१-८॥
- अहं ध्याता परं ध्येयमखण्डं खण्ड्यते कथम् ? ॥१-१२॥
- सन्तोषसन्ततिसुखं न च मे कदाचित् ॥३-१३॥
- किं नाम रोदिषि सखे ! न च ते विरूपम् ॥३-३५॥
- त्वद्यात्रया व्यापकता हता ते ॥८-१॥
- वर्तमानेषु वर्तेत वकारं तस्य लक्षणम् ॥८-७॥
- चतुर्थी स्त्री सुरा ज्ञेया ययेदं मोहितं जगत् ॥८-२५॥

# अवधूतोपनिषद् प्रसादी

- उभयथाऽपि परमात्मभेदाभावः, आद्ये तद्विगमे स्वरूपहानिप्रसक्तेः, परमात्मनो वाङ्मात्रपर्यवसानात्, अतिरेके स्वत एवाविशिष्टभावसिद्धेश्च ॥१-१२॥

- स्वभावविलयस्वविलययोरनर्थान्तरत्वेन त्वदस्तित्वमेव त्वत्परमात्मभावे प्रमाणम्, तत्स्वभावत्वात्तवेत्याशयः ॥१-१४॥

- न हि वन्ध्यासुतास्थया स्वसुतमुपेक्षते कश्चिद् विपश्चि-दिति ॥१-२१॥

- एवंरूपां स्त्रियं विद्धि - श्रुतचक्षुषाऽवगच्छ, विषा-ऽऽस्वादतस्तत्परीक्षणस्य मरणकारणत्वादिति ॥८-१२॥

- यत्किञ्चित्संवासस्यापि स्नेहावहतया विशिष्टराग-गोचरसंवासस्य सुतरां तद्धेतुभावात्, तदुक्तम् - संवासाज्जायते स्नेहो, जीवितान्तकरेष्वपि । अन्योऽन्यस्य च विश्वासः, श्वपचेन शुनो यथा - इति ॥८-२४॥

अथ

नवनिर्मित-अवधूतोपनिषद्-व्याख्यालङ्कृता

# अवधूतगीता

श्रीवर्द्धमानं जिनवर्द्धमानं,
सूरीन्द्रमेवं गुरुहेमचन्द्रम् ।
प्रणम्य नम्यं ह्यवधूतगीता-
सूक्तेषु सूक्तिं वितनोमि वृत्तिम् ।।

इह हि परमकारुणिको गीताकारो विश्वविश्वविपल्लताकन्दतया द्वैतभावनमेव वीक्ष्यमाणस्तत्प्रतिपक्षप्राप्तिमन्तरेण तन्मूलोन्मूलनमसम्भवद्विधानं विमृश्य तद्धेतोरेवास्तु किं तेनेतिनीत्या प्रथमं प्रतिपक्षप्रसूमेवोपन्यस्यन्नाह-

**ईश्वरानुग्रहादेव, पुंसामद्वैतवासना ।**
**महद्भयपरित्राणा, विप्राणामुपजायते ।।१-१।।**

**ईश्वरानुग्रहादेव** - भगवद्बहुमानप्रयुक्ततदाज्ञानुपालनादेव, उप्यते धर्मबीजमेष्विति **विप्राः**, टुवप् बीजसन्ताने, आसन्नभव्या इत्यर्थः, तेषां **पुंसाम्** - आत्मनाम्, **महद्भयपरित्राणा** - दृश्यमानचौरादिसाध्वसातिशायिरौरवनरकादिदारुणदुःखात्मकभयेभ्यः स्वपरिणतिपूतात्मनां रक्षणकर्त्री, **अद्वैतवासना** - सर्वपापाश्रवनिरोधयोनिः सर्वभूतविषयकात्मभावदर्शनभाविततता, **उपजायते** - सदुपायादृतिक्रीतेव

नियोगत उद्भवति । तदेतदद्वैतमुपदिष्टं पारमर्षेऽपि - सव्वभूयप्पभूअस्स सम्मं भूयाइं पासओ । पिहिआसवस्स दंतस्स पावकम्मं न बंधइ - इति **(दशवैकालिके ४-३२)** ।

हिंसातो हि पापाश्रवप्रसूतिः, सा च द्वैतदर्शनसहचारिणी, स्वाभिन्नज्ञानविषये मन्दानामप्यहिंसादर्शनात्, अतोऽद्वैतभावनात्मके सर्वजीवात्मौपम्ये रन्तव्यम्, तथा चागमः - जह ते न पियं दुक्खं जाणिय एमेव सव्वजीवाणं । सव्वायरमुवउत्तो अत्तोवम्मेण कुणसु दयं - इति **(भक्तपरिज्ञायाम् ९०)** । अयमेव योगः, समदर्शिताऽपि चेयम्, यदात्मौपम्येन सर्वत्राविशिष्टकृपारसपरिणतिपरिणतत्वम्, अतो यतितव्यमत्र, उक्तञ्च - सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि। ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः-इति **(भगवद्-गीतायाम् ६-२९)** ।

न चैतद् भगवदनुग्रहमन्तरेण, सामग्रीप्रभवत्वेऽपि महानुभावतयाऽस्यैव प्राधान्यात् । भवत्येतदासन्नस्य भगवति बहुमानः, ततोऽपि सद्देशनायोग्यता, ततोऽपि तच्छ्रवणम्, ततोऽपि बहुमानातिशयेन श्रुतानुपालनम्, ततश्चावश्यमद्वैतभावनाभाविततेति तदाधिपत्यसिद्धिः ।

सर्वभूतसाम्यं च सर्वत्रात्मद्रव्यस्याविशिष्टत्वात्, न चोपाधिकृतविशेषोऽस्तु, प्रत्यक्षमीक्ष्यमाणस्यापह्नवासम्भवादिति वाच्यम्, अत्यन्तं विजातीयत्वेन मत्स्वरूपातिरिक्तत्वात्तस्य मत्सम्बद्धत्वविरहात्, एतदेव साक्षादाचष्टे-

**न मानसं कर्म शुभाशुभं मे,**
**न कायिकं कर्म शुभाशुभं मे ।**
**न वाचिकं कर्म शुभाशुभं मे,**
**ज्ञानामृतं शुद्धमतीन्द्रियोऽहम् ।।१-८।।**

कर्मणो मत्सम्बन्धिनोऽभावान्न मे काचित् प्रशस्ताप्रशस्तमनोवाक्कायप्रवृत्तिः, मनःप्रभृतेरेव मद्‌भिन्नत्वात्, वैधर्म्योपलब्धेः, पौद्‌गलिकत्वात् चित्तप्रभृतेः, तथा चावोचाम - वैधर्म्यं यत्र तद् भिन्नं पृथिव्या गगनं यथा । ज्ञस्वभावोऽज्ञकादस्माद् भिन्नोऽस्मि पुद्‌गलादहम् - इति **(शमोपनिषदि ५-४)** ।

वैधर्म्यलक्षणं हेतुमेव हेतुगर्भितविशेषणेन समर्थयति **ज्ञानामृतम्** - इति, यतो ह्यहममृतोपमज्ञानमात्रविग्रहो ज्ञानगुणो वा, अत एव मनआदिपुद्‌गलातिरिक्तः, उक्तञ्च - पुद्‌गलानां गुणो मूर्तिरात्मा ज्ञानगुणः पुनः । पुद्‌गलेभ्यस्ततो भिन्न-मात्मद्रव्यं जगुर्जिनाः - इति **(अध्यात्मसारे १८-४८)** ।

स्यादेतत्, सत्यपि ज्ञानमयत्वे पुद्‌गलव्यामिश्रताप्रयुक्तसम्बन्धोऽस्तु, एवमेव व्यवहारनिर्वाहादिति चेत् ? स एष भ्रान्तनिर्वाहाय भ्रान्तिमुद्‌भावयन्नसिद्धमसिद्धेन साधयति, परमार्थत उक्तव्यामिश्रत्वस्यैवाभावात् एतदेवाह - **शुद्धम्** - विपक्षलेशेनाप्यकलङ्‌कितम्, एतदपि हेतुगर्भितं विशेषणम्, यतो ह्यहं शुद्धं ज्ञानामृतम्, अतो न मे प्रसञ्जितसम्बन्धप्रसङ्‌गः ।

इतश्च मे मानसादिकर्माऽसम्भव इत्याह - **अतीन्द्रियोऽहम्**, यतो ह्यहमिन्द्रियनोइन्द्रियसमतीतः, अतोऽपि मम तत्तत्कर्म-सम्बन्धाभावः ।

अतस्तत्तत्कर्मसु ममत्वभावं विहायात्मज्ञाने प्रयत्नो विधेयः, एतदेवोपदेष्टि-

**आत्मानं सततं विद्धि, सर्वत्रैकं निरन्तरम् ।**
**अहं ध्याता परं ध्येयमखण्डं खण्ड्यते कथम् ॥१-१२॥**

**सततम्** - विषयान्तरसञ्चारलवेनापि परिवर्जितं यथा स्यात्तथा, तत्सञ्चारस्य हालाहलानतिरिक्तत्वात्, उक्तञ्च - यस्य ज्ञानसुधासिन्धौ परब्रह्मणि मग्नता । विषयान्तरसञ्चारस्तस्य हालाहलोपमः - इति **(ज्ञानसारे २-२)**, **सर्वत्र** - अखिलजीवदधिकरणे, **एकम्** - अद्वितीयं विजातीयलेशपरिमुक्तं संशुद्धमिति यावत्, **निरन्तरम्** - मिथो विशेषविरहितम्, विशेषकस्योपकल्पिततयाऽसत्प्रायत्वात्, **आत्मानं विद्धि** - आत्मज्ञानमात्रपरिणतिपयःप्रसराप्लावितो भव, तस्मिन् ज्ञातेऽज्ञातेऽपि शेषज्ञाननैरर्थ्यात्, व्याकुलतादिहेतुभावेनानर्थनिबन्धन-त्वाच्च, तथा चोक्तम् - एक एव भगवानयमात्मा ज्ञानदर्शन-तरङ्गसरङ्गः । सर्वमन्यदुपकल्पितमेतद् व्याकुलीकरणमेव ममत्वम् - इति **(शान्तसुधारसे ४-१)** ।

स्यादेतत्, मा भूत् पुद्गलप्रयुक्तमन्तरम्, विशिष्टात्मप्रयुक्तं तु तदस्तु, आत्मपरमात्मभेदस्य सुप्रसिद्धत्वादिति चेत् ? किन्निबन्धनः

स इति वक्तव्यम्, दोषहेतुकः कर्मकारणोऽविद्यायोनिर्वेति चेत् ? तेऽपि दोषादय आत्मभूतास्तदतिरिक्ता वा ? उभयथाऽपि परमात्मभेदाभावः, आद्ये तद्विगमे स्वरूपहानिप्रसक्तेः परमात्मनो वाङ्मात्रपर्यवसानात्, अतिरेके स्वत एवाविशिष्टभावसिद्धेश्च ।

ननु सर्वतन्त्रप्रसिद्धपरमात्मतत्त्वापह्नवोऽयमागमबाधित इति चेत् ? न, भेदमात्रनिराकृतेर्विवक्षिततत्वात् साधितत्वाच्च, परमार्थत आत्मन एव परमात्मभूतत्वात्, तदाह-आत्मनि परमात्मानं पश्यन्ति ज्ञानयोगिनः - इति **(कृष्णगीतायाम् ९३)** ।

एवं च यदाऽभिन्नमेवात्मद्रव्यम्, तदा - **अहं ध्याता परं ध्येयम्** - इत्यभिमानेना**खण्डम्** - उक्तनीत्या परमात्मभेदप्रशून्यम्, **कथं खण्ड्यते ?** ध्याताध्येयमात्रगोचरभेदोऽपि सम्भिन्नद्वैतभावनाग्रन्थीनां न सङ्गतिमङ्गतीत्याकूतम्, एतदेवाभिप्रेत्योदितमन्यत्र - ब्रह्माद्यं स्थावरान्तं च पश्यन्ति ज्ञानचक्षुषः । तमेकमेव पश्यन्ति परिशुभ्रं विभुं द्विजाः - इति **(मन्त्रिकोपनिषदि १६)** ।

यत एवम्, ततः -

**स बाह्याभ्यन्तरोऽसि त्वं, शिवः सर्वत्र सर्वदा ।**
**इतस्ततः कथं भ्रान्तः, प्रधावसि पिशाचवत्? ॥१-१४॥**

**सर्वत्र** - सर्वदेशावच्छेदेन, क्षेत्रविशेषभावेऽपि स्वभावाविशेषसम्पन्नतयेत्याशयः, **सर्वदा** - सर्वकालावच्छेदेन, कालवैशिष्ट्ययोगेऽपि स्वभावाभेदविभूषितता यथा स्यात्तथेति भावः, **सः** -

द्वैतपरिणतिदशायां भिन्नत्वेनाभिमतः, **शिवः** - परमात्मा, **बाह्याभ्यन्तरः**, विश्वतोऽप्येकरसीभूततया भिन्नावच्छेदप्रयुक्तभेदाभाववानिति हृदयम्, **त्वमसि**, स्वभावविलयस्वविलययोरनर्थान्तरत्वेन त्वदस्तित्वमेव त्वत्परमात्मभावे प्रमाणम्, तत्स्वभावत्वात्तवेत्याशयः।

एवं सति **पिशाचवत्** - कुतूहलादिकदर्थितव्यन्तरदेववत्, **भ्रान्तः** - बहिर्गतवस्तुदर्शनादिहेतुकमदवाप्तव्यावाप्तिरित्येतदाकारकभ्रमकलुषितान्तःकरणः सन्, **इतस्ततः** विषयवने ध्येयध्यानादिडम्बरे वा, **कथं प्रधावसि ?** प्रधावनसिषाधयिषितसाध्यस्य विषयसुखस्यान्याश्रयत्वात् परमात्मपदप्राप्तेश्च स्वतः सिद्धत्वान्नैव तव प्रधावनं सचेतस्कसाधनमित्यभिप्रायः ।

नन्वसिद्धमन्याश्रयत्वं विषयसुखस्य, स्वसंवेदनसिद्धत्वेन स्वाधिकरणकत्वात्तस्येति चेत् ? अत्राह -

**शब्दादिपञ्चकस्यास्य, नैवासि त्वं न ते पुनः ।**
**त्वमेव परमं तत्त्वमतः किं परितप्यसे ।।१-१६।।**

**अस्य** - अध्यक्षमुपलभ्यमानस्य बुद्धिप्रत्यक्षस्य वा, **शब्दादिपञ्चकस्य** - शब्द-रूप-गन्ध-रस-स्पर्शलक्षणविषयपञ्चकस्य, **त्वं नैवासि**, त्वत्तोऽत्यन्तपृथक्त्वात्तस्य त्वत्सम्बन्धिभावस्यापि वक्तुमशक्यत्वात्, अत एव **न ते पुनः** उक्तपञ्चकम्, सम्बन्धस्य द्व्याश्रयतयैकस्मिन्नसत्त्वेऽपरत्राभावध्रौव्याच्च । प्रयोगश्चात्र - चैत्रशरीरसम्पृक्तशब्दादयस्तदात्मसम्बन्धिनो न, अत्यन्तं पृथक्त्वात्,

मैत्रशरीरसम्पृक्तशब्दादिवत्, तत्पार्थक्यमपि शरीरस्यैवात्यन्तपृथक्त्वात्, अमूर्त्तस्यांशेनापि मूर्त्तत्वावगाहनासम्भवात्, पावकशैत्यवत् ।

नन्वेवं सुखित्वाद्यनुभूतेर्भ्रान्तत्वापत्तिरिति चेत् ? सेयमिष्टापत्तिरेव निश्चयाभिप्रायतः, तदुक्तम् - देहेन सममेकत्वं मन्यते व्यवहारवित्। कथञ्चिन्मूर्त्ततापत्तेर्वेदनादिसमुद्भवात् ।। तन्निश्चयो न सहते यदमूर्त्तो न मूर्त्तताम् । अंशेनाप्यवगाहेत पावकः शीततामिव - इति **(अध्यात्मसारे १८-३४, ३५)** । ननु यद्यनुभूयमानं विषयसुखमपि तत्त्वतो न मदीयम्, किं तर्हि ममेति चेत् ? अत्राह - **त्वमेव परमं तत्त्वमतः किं परितप्यसे ?** यथा हिमालयस्य वातायनाशा न भवति, तथा सर्वतत्त्वातिशायिनस्तवावाप्तव्यमेव तन्नास्ति, यत् परितापालम्बनं कर्तुमुचितमिति भावः ।

इतश्च परितापोऽयुक्त इत्याह -

**जन्म मृत्युर्न ते चित्तं, बन्धमोक्षौ शुभाशुभौ ।**
**कथं रोदिषि रे वत्स!, नामरूपं न ते न मे ।।१-१७।।**

**न ते जन्म,** अजत्वात्, अजीवत् जीवति जीविष्यतीति त्रैकालिकजीवपदार्थाभ्युपगमात्, अत एव न ते **मृत्युः**, जातविषयकत्वात्तस्य, नापि ते **चित्तम्,** न मानसं कर्म शुभाशुभं मे - **(अवधूतगीतायां १-८)** इत्यत्र प्रतिक्रुष्टत्वात्, नापि ते **बन्धमोक्षौ,** शुद्धनयाभिप्रायेणानादिशुद्धस्य तदभावात्, तदाह-अशुद्धनयतो ह्यात्मा बद्धो मुक्त इति स्थितिः । न शुद्धनयतस्त्वेष बध्यते नापि मुच्यते

- इति (**अध्यात्मसारे १८-१९०**), नापि ते **शुभाशुभौ** - शस्ताशस्तसमस्तविकल्पाति-क्रान्तत्वात्तव ।

किञ्च नामसहितं रूपम् - **नामरूपम्**, तन्न **ते नापि मे**, नाम्नो विकल्पयोनित्वेन परमार्थतोऽविद्यमानत्वात्, रूपस्यान्य-धर्मतयाऽऽत्मसम्बन्धित्वविरहात्, तदुक्तम् - रूपिणः पुद्गलाः - इति (**तत्त्वार्थसूत्रे ५-४**) ।

एवं स्थिते **रे वत्स** ! त्वं **कथं रोदिषि** ? न कथञ्चित्त्व-द्रुदनक्रिया घटामटाट्यते, तथाविधहेत्वभावादित्याकूतम् । न च रुदनक्रियैव, अपि तु क्रियामात्रमपि तवासङ्गतमित्याह -

**त्वमेव तत्त्वं हि विकारवर्जितं,**
**निष्कम्पमेकं हि विमोक्षविग्रहम् ।।**
**न ते च रागो ह्यथवा विरागः,**
**कथं हि सन्तप्यसि कामकामतः ।।१-१९।।**

**हिः** - यतः, **त्वमेव विकारवर्जितं तत्त्वम्**, तत्तद्विकारस्योक्त-विधया पुद्गलाश्रितत्वात्, अन्वाह - न मे मृत्युः कुतो भीतिर्न मे ग्लानिः कुतो व्यथा ? । नाहं बालो न वृद्धोऽहं न युवैतानि पुद्गले - इति (**इष्टोपदेशे २९**) । तथा **एकं हि** - अद्वितीयमेव, **निष्कम्पम्** - हर्षशोकादिसङ्क्षोभशून्यम्, **विमोक्षविग्रहम्** - नित्यतया वैशिष्ट्योपेतमुक्तिस्वरूपम्, तत्त्वं त्वमसीति वर्तते ।

**न च ते रागः**, निरञ्जनभावानुभावात्, **अथवा हि विरागोऽपि** न ते, प्राग्रक्तस्य तद्दर्शनात् । ततश्च त्वं **कामकामतः** - इष्ट-शब्दादिस्पृहासकाशात्, **कथं सन्तप्यसि ?**, न हि परमानन्द-परिणतितत्परस्य तवेष्टसंयोगाद्यात्मकमार्त्तध्यानमौचितीमञ्चति, चक्रवर्त्तिणः श्वस्तनभोजनतप्तिवदिति हृदयम् ।

इतश्चोक्तसन्तप्तिस्त्याज्या, असद्विषयत्वादित्याह -

**साकारमनृतं विद्धि, निराकारं निरन्तरम् ।**
**एतत्तत्त्वोपदेशेन, न पुनर्भवसम्भवः ।।२१।।**

आकारः प्रकृते पौद्गलिकं संस्थानं गृह्यते, तेन सहितम् - **साकारम्** - पुद्गलद्रव्यम्, तद् **अनृतम्** - अनित्यत्वेनासत्प्रायम्, इति त्वं **विद्धि** - अनित्यभावनानुभावेन बुध्यस्व, उक्तञ्च - आयुर्वायुतरत्तरङ्गतरलं लग्नापदः सम्पदः, सर्वेऽपीन्द्रियगोचराश्च चटुलाः सन्ध्याभ्ररागादिवत् । मित्रस्त्री-स्वजनादिसङ्गमसुखं स्वप्नेन्द्र-जालोपमं तत्किं वस्तु भवे भवेदिह मुदामालम्बनं यत् सताम् - इति **(शान्तसुधारसे १-२)** ।

किं तर्हि नित्यमित्याह - **निराकारम्** - आकाररहितम्, आत्मद्रव्यमित्यर्थः, **निरन्तरम्** - विशेषविरहितम् - परमार्थ-सत्त्वेनाविशेषम् । चिच्चमत्कारमात्रादात्मद्रव्यादन्यत्सर्वमप्यनित्यम्, इदमेवैकं नित्यमित्याशयः, यथोक्तम्-नित्यमेकं चिदानन्दमयमात्मनो रूपमभिरूप्य सुखमनुभवेयम् - इति **(शान्तसुधारसे १-९)** ।

न च तन्नित्यत्वे नृनारकादिपर्यायभेदानुपपत्तिरिति वाच्यम्, तद्भेदेऽप्यात्मद्रव्यभेदाभावात्, आत्मनोऽन्वयित्वात्, हेमकेयूरादिवत्, भिन्नपर्यायत्वेन परमार्थत आत्मपर्यायत्वस्यैवाभावाच्च, तदाह-नृनारकादिपर्यायैरप्युत्पन्नविनश्वरैः । भिन्नैर्जहाति नैकत्वमात्मद्रव्यं सदान्वयि ।। यथैकं हेम केयूर-कुण्डलादिषु वर्तते । नृनारकादिभावेषु तथात्मैको निरञ्जनः ।। कर्मणस्ते हि पर्याया नात्मनः शुद्धसाक्षिणः। कर्मक्रियास्वभावं यदात्मा तु ज्ञस्वभाववान् - इति **(अध्यात्मसारे १८/२३-२५)** ।

**तदेतत्तत्त्वोपदेशेन** पुनः पुनर्भवन्त्यत्र भविन इति **पुनर्भवः** - संसारः, तस्य **सम्भवो न** भवति, उक्ततत्त्वोपदेशश्रवणेनानात्मास्थाविलययोगेनाभिहितात्महिताभियोगानामचिरेणापुनर्भवसम्भवात्, न हि वन्ध्यासुतास्थया स्वसुतमुपेक्षते कश्चिद् विपश्चिदिति ।

दशाविशेषे त्वात्मास्थाऽप्युपेक्षणीया स्यात् समाधिलाभाभिलाषिणामित्याह -

**अनात्मरूपं च कथं समाधि-**
**रात्मस्वरूपं च कथं समाधिः ।**
**अस्तीति नास्तीति कथं समाधि-**
**र्मोक्षस्वरूपं यदि सर्वमेकम् ।।१-२३।।**

**अनात्मरूपं च** - पुद्गलद्रव्यमेव तत्त्वमित्याग्रहग्रहिलस्य

**कथं समाधिः ?**, सद्विकल्पस्यापि समाधिप्रत्यूहत्वेनासद्विकल्पे सुतरां तद्भावसद्भावात्तद्वतोऽसमाधिरेवेत्याशयः । एतदेव समर्थयन्नाह - **आत्मस्वरूपं च** - जीवस्वलक्षणमेव तत्त्वमिति - ग्रहदुर्गृहीतस्यापि **कथं समाधिः ?**, विकल्पसामानाधिकरण्यस्यैव समाधेरसम्भवात्तत्समाधेरभाव एवेति भावः, उक्तञ्च - निर्विकल्पा स्वसंवेद्या समाधिरभिधीयते - इति **(रामगीतायाम् ८-३७)** ।

ननु यद्येवं तर्हि कृतमात्मानात्मचिन्तया, सन्मात्रमेव भावयामोऽभावमात्रं वेति चेत् ? अत्राह-**अस्तीति** भावविभावनपरस्य **नास्तीति** अभावावलोकनाक्षणिकस्य च **कथं समाधिः?** तद्विमर्शस्यापि विकल्पकुक्षिप्रविष्टतया समाधिपरिहृतिप्रवणत्वान्नास्यापि समाधिर्घटाकोटिमाटीकते, अभावकतालक्षणनैराकुल्यमूलकत्वात्समाधेरित्याकूतम्, अभिहितं च - भावस्य भावकः कश्चिन्न किञ्चिद्भावकोऽपरः । उभयाभावकः कश्चिदेवमेव निराकुलः - इति **(अष्टावक्रगीतायाम् १८-४२)** ।

**यदि मोक्षस्वरूपम्** - मुक्तिलक्षणम्, **सर्वमेकम्** - सर्वथापि समरसैकरसीभूतमेव ।

एवञ्च यत्किञ्चिद्ग्रहसद्भावे जीवन्मुक्त्यपरपर्यायसमाधिरनुपपन्नैव, समरसैकरसीभूतसमाध्यवस्थायां विकल्पकल्लोललोलत्वासम्भवादित्याशयः, उक्तञ्च - समस्तनष्टसङ्कल्पः, समाधिरभिधीयते - इति **(सौभाग्यलक्ष्म्युपनिषदि १६)** ।

एतदेवाह प्रकारान्तरतः -

**अद्वैतं केचिदिच्छन्ति, द्वैतमिच्छन्ति चापरे ।**
**समं तत्त्वं न विन्दन्ति, द्वैताद्वैतविवर्जितम् ।।१-३६।।**

ननु च कथमद्वैतापलाप इति चेत् ? द्वैताभावात्, अब्राह्मणस्य ब्राह्मणाभावेऽभाववत् । द्वैतमेव तर्ह्यस्तु संव्यवहारसिद्धमिति चेत् ? न, द्वितीयानुपलम्भात् । एतदेव व्यक्तं व्यनक्ति -

**न ते च माता च पिता च बन्धु-**
**र्न ते च पत्नी न सुतश्च मित्रम् ।**
**न पक्षपातो न विपक्षपातः,**
**कथं हि सन्तप्तिरियं हि चित्ते ।।१-६३।।**

**ते** - तव, **माता न च** - नैव ते काचित् प्रसूः, अनाद्यन्तस्य तव प्रसवाभावात्, **पिता च** ते नास्ति, पाति रक्षतीति पितेति-निरुक्तिसमन्वयासम्भवात्, भयविरहेण रक्षणविषयस्यैवासद्भावात्, ते **बन्धु** - रपि न, बध्नाति स्नेहेनेति बन्धुरित्यन्वयार्थोपेतस्य कस्यचित् निरञ्जनत्वत्सम्बन्धित्वायोगात् । **न च ते पत्नी,** ध्रुवस्वरूपे त्वयि कस्यचित्पतनप्रयोजकत्वासम्भवात्, न **सुतश्च** ते सम्भवति, मूलं नास्ति कुतः शाखेतिन्यायात्, अङ्गस्यैवाभावेऽङ्गजानुत्थानात्। नापि ते **मित्रम्,** विपद्यपि मेद्यति स्निह्यतीति मित्रमितिव्युत्पत्ति-व्यालिङ्गितस्य विपदविषयसम्बन्धित्वासम्भवात् ।

अन्तरङ्गसम्बन्धविरहादेव तव बहिरङ्गसम्बन्धासम्भव इत्याह

- **न** ते **पक्षपातः** - कुत्रचिदप्यभिष्वङ्गः, **नापि** ते **विपक्षपातः**, विगतः पक्षपातो यस्य स इत्यन्वर्थस्याकालं पक्षपातप्रशून्ये त्वय्यघटनात्, सत्यप्येवं **हिः** - खेदे, ते **चित्ते कथमियं सन्तप्तिः ?**, **हिः** - आश्चर्ये । असद्विषयतयानुचितैव सा, वन्ध्यापुत्रोद्वाहव्ययचिन्तावदिति भावः।

तदेतत्सन्तप्त्यपहतिः स्वभावानुप्रवेशमन्तरेणासाध्येति तमेव कारयति -

**निरामयं निष्प्रतिमं निराकृतिं,**
**निराश्रयं निर्वपुषं निराशिषम् ।**
**निर्द्वन्द्वनिर्मोहमलुप्तशक्तिकं,**
**तमीशमात्मानमुपैमि शाश्वतम्।।२-३१।।**

**निरामयम्**, द्रव्यभावरोगरहितत्वात्, **निष्प्रतिमम्**, सादृश्योपेतद्रव्यान्तरविरहात्, **निराकृतिम्** - अनित्थंस्थावस्थितत्वात्, यत् पारमर्षम् - अरूविसत्ता अणित्थंत्थसंठाणा - इति **(पञ्चसूत्रे ५)**, **निराश्रयम्**, विहायोवन्निरालम्बभावावभासितत्वात्, **निर्वपुषम्** - औदारिकादिशरीरविसरातिरिक्तत्वात्, **निराशिषम्**, आशापिशाचीपरिमुक्तत्वात्, **निर्द्वन्द्वम्**, सर्वोपाधिशून्यत्वात्, **निर्मोहम्**, चञ्चच्चिच्चिन्तामणिप्रभवप्रभावात्, **अलुप्तशक्तिकम्**, स्वभावभूतसामर्थ्यसंहारस्याशक्यत्वात्, **तम्** - अनन्तरोक्तविशेषणविसरविशिष्टत्वेन बुद्धिप्रत्यक्षम्, **ईशम्** - परमैश्वर्यस्वामिनम्, **शाश्वतम्** - कालत्रयेऽपि

समानतया सद्भावसम्पन्नम्, **आत्मानमुपैमि**, सर्वविभावघटाविघटनपुरस्सरं स्वस्वभावमनुप्रविशामीति भावः ।

स्वभावमेव प्रकारान्तरतः प्रादुष्करोति -

**स्थूलं हि नो नहि कृशं न गतागतं हि,**
**आद्यन्तमध्यरहितं न परापरं हि ।**
**सत्यं वदामि खलु वै परमार्थतत्त्वं,**
**ज्ञानामृतं समरसं गगनोपमोऽहम् ।।३-६।।**

**नो हि स्थूलम्** - नैवाहं पीनं तत्त्वम्, **न हि कृशम्** - नाप्यहं क्षामं तत्त्वम् । ननु प्रत्यक्षमीक्ष्यमाणपीवरादिपर्यायनिगूहनमेतदिति चेत् ? अबुधाभिप्रायेणैवमेव, बुधस्य त्वन्याश्रयतया स्थूलादिपर्यायाणामात्मसम्बद्धत्वविरहान्न कापि निगूहनाऽऽशङ्का, वस्त्रादिपर्यायपार्थक्यवद्देहपर्यायभिन्नत्वे निश्चितमतित्वात्, वदन्ति च - घने वस्त्रे यथात्मानं न घनं मन्यते तथा । घने स्वदेहेऽप्यात्मानं न घनं मन्यते बुधः । जीर्णे वस्त्रे यथाऽऽत्मानं न जीर्णं मन्यते तथा । जीर्णे स्वदेहेऽप्यात्मानं न जीर्णं मन्यते बुधः ।। नष्टे वस्त्रे यथाऽऽत्मानं न नष्टं मन्यते तथा । नष्टे स्वदेहेऽप्यात्मानं न नष्टं मन्यते बुधः ।। रक्ते वस्त्रे यथात्मानं न रक्तं मन्यते तथा । रक्ते स्वदेहेऽप्यात्मानं न रक्तं मन्यते बुधः - इति **(समाधितन्त्रे ६३-६६)**

**न हि गतागतम्**, द्रव्यान्तरावधिकयातायातक्रियान्वितं तत्त्वमप्यहं

न, कालत्रयेऽपि तादात्म्यपरिणामनिवृत्तिलक्षणत्वा-दित्याशयः, उक्तञ्च - आत्मा न गन्ता नागन्ता किमेनमनुशोचसि ? - इति **(अष्टावक्रगीतायाम् १५-९)** ।

अत एवा**द्यन्तमध्यरहितम्**, तत्रादिभावाभावः शश्वत्सद्भावोपलब्धेः, सान्तत्वविरह उक्तहेतोरेव, मध्यतानवकाश आद्यन्तविरहे तददर्शनात् ।

**न हि परापरम्**, समरसैकरसीभूते प्रकर्षापकर्षाभावात् । अत्रैव प्रतीतिमुत्पादयति - **सत्यमित्यादि** । सुगममुक्तार्थं च । किञ्च

**संसारसन्ततिलता न च मे कदाचित्,**
**सन्तोषसन्ततिसुखं न च मे कदाचित् ।**
**अज्ञानबन्धनमिदं न च मे कदाचित्,**
**ज्ञानामृतं समरसं गगनोपमोऽहम् ।।३-१३।।**

**न च** - नैव, **कदाचित्** - कालत्रयेऽपि, **मे** - शुद्धात्मनः, **संसारसन्ततिलता** - भवभ्रमणपरम्परात्मिका वल्ली, दृश्यमानसन्तानस्य दृश्यगोचरत्वाच्छुद्धात्मनोऽदृश्यतया तदविषयत्वात्, शरीरादिपुद्गलाश्रितपरम्पराया आत्मन्युपचरणस्य शुद्धनयेऽसम्मतत्वात्, यद्येवमुपचर्यते तर्हि भिन्नाधिकरणकसन्तानस्यापि विवक्षित आत्मन्यस्तूपचारः, भिन्नत्वाविशेषात् । नो चेत्, तदा प्रकृतेऽपि मा भूत्, तत एवेति ।

अपरमपि मत्सम्बन्धि नास्तीत्याह - **न च** - नैव, **मे कदाचिदपि सन्तोषसन्ततिसुखम्** - तृषोपशमप्रसूतोद्गारपरम्पराप्रभवा प्रीतिः, पितामहाभावे पौत्राद्यभाववत्, तृषाया एवाभावात् ।

किञ्च - **इदम्** - अवेद्यसंवेद्यपदेन योगाचार्यैरभिहितत्वेन बुद्धिप्रत्यक्षम्, **अज्ञानबन्धनम्** - अज्ञानोपकल्पितं बन्धनम्, परमार्थतस्तदभावात्, अन्वाह - शुद्धनिश्चयतस्त्वात्मा न बद्धो बन्धशङ्कया । भयकम्पादिकं किन्तु रज्जावहिमतेरिव ।। शङ्खे श्वेत्यानुमानेऽपि दोषात्पीतत्वधीर्यथा । शास्त्रज्ञानेऽपि मिथ्याधी - संस्काराद् बन्धधीस्तथा - इति **(अध्यात्मसारे १८-१७३, १७६)**, **न च मे कदाचित्**, नित्यज्ञानालोकालोकितसदातनमुक्तभावत्वान्मम।

उक्तप्रतिज्ञात्रयमेव पश्चानुपूर्व्या हेतुगर्भितविशेषणैः समर्थयति - यतो ह्यहं **ज्ञानामृतम्**, अतो न मेऽज्ञानबन्धनम् । यतोऽहं **समरसम्**, अतो न मे तृषातृप्ती । यतश्चाहं **गगनोपमः**, अतो न मे संसरणमिति ।

एतेनैव हेतुत्रितयेन प्रतिज्ञान्तराणि साधयति -

**किं नाम रोदिषि ? सखे ! न जरा न मृत्युः,**
**किं नाम रोदिषि ? सखे ! न च जन्मदुःखम्।**
**किं नाम रोदिषि ? सखे ! न च ते विकारो,**
**ज्ञानामृतं समरसं गगनोपमोऽहम् ।।३-३४।।**

**सखे ! किं नामैवं** त्वं **रोदिषि ?** - स्वान्तरमीयमान-शोकमम्बकाम्बुभिः प्रकटयसि, यदहं जराजीर्णोऽभवमित्यादि, न युक्तमिदं रुदनम्, यतो **न** ते **जरा, ना**पि ते **मृत्युः**, अजरामरत्वात्तव, न चैवम् - मच्चुणाऽब्भाहओ लोगो, जराए परिवारिओ - इति **(उत्तराध्ययने १४-२३)** - इत्यागमविरोध इति वाच्यम्, लोकशब्देन तत्र शुद्धात्मनोऽविवक्षितत्वात्, तस्य जरादिविरहात्, प्रकृतत्वाच्च, तथोक्तम् - न मे मृत्युः कुतो भीतिर्न मे ग्लानिः कुतो व्यथा?। नाहं बालो न वृद्धोऽहं न युवैतानि पुद्गले - इति (इष्टोपदेशे)। एतेन - न कश्चिज्जात्वतिक्रामेज्जरामृत्यू हि मानवः । अपि सागरपर्यन्तां विजित्येमां वसुन्धराम् - **(महाभारते शान्तिपर्वणि २८-१५)** इत्यादिवचोविरोधप्रेरणमपि प्रत्याख्यातम् ।

इत्थमेव - मरणं प्रकृतिः शरीरिणां, विकृतिर्जीवितमुच्यते बुधैः - **(रघुवंशे ८-८७)** इत्यादि - वचनमपि समाधेयम्, शरीरिणः शरीरविशिष्टत्वेन सविशेषणेत्यादिन्यायेन मरणप्रकृतेः शरीर एव पर्यवसानात् । ननु चैवं जीवनस्यापि तत्पर्यवसितत्वापत्तिरिति चेत्? सेयमिष्टापत्तिरेव, श्वासोच्छ्वासाद्यात्मकजीवनस्य पुद्गला-श्रयत्वेनाभिमतत्वात् ।

रुदनालम्बनान्तरमपाकरोति - **किमि**त्यादि । जन्मनोऽपि पुद्गलाधिकरणकतयेष्टत्वान्न तद्दुःखकल्पनातोऽपि त्वद्रुदनं सङ्गतिमङ्गति, स्मशानयात्रादर्शने स्वमृत्युशोकवदिति भावः ।

एवं रोगाद्यपि न रुदनालम्बनीभवितुमर्हति, सदा स्वभाव - प्रतिष्ठितत्वात्तवेत्याह - **किमित्यादि**, ज्वराद्यगोचरत्वात्तव न तत्प्रत्ययिकमपि शोचनं शोभास्पदमित्याशयः ।

किं तर्हि कर्तव्यं मयेत्यत्राह - एतदेव विभावय - **ज्ञानामृतं समरसं गगनोपमोऽहम्** - इति । ज्ञानामृतरूपत्वाज्जराद्यभावः, जडधर्मत्वात्तस्य । समरसत्वाज्जन्मविरहः, वैषम्ययोनित्वादुद्भवादेः, आपेक्षिकत्वात्, अन्यथा नित्यसत्त्वादिप्रसक्तेश्च । गगनोपमत्वाद्विकारविरहः, पङ्कस्थानीयहेतुसद्भावेऽप्यकलङ्कभावानतिवृत्तेरिति । इतोऽपि त्वया न रुदितव्यमित्याह -

**किं नाम रोदिषि सखे ! न च ते स्वरूपं,**
**किं नाम रोदिषि सखे ! न च ते विरूपम् ।**
**किं नाम रोदिषि सखे ! न च ते वयांसि,**
**ज्ञानामृतं समरसं गगनोपमोऽहम् ॥३-३५॥**

**किमित्यादि** । त्वद्यत्नादिगोचरस्य परकीयत्वेन तदर्थरुदनं न तव सचेतस्कतां साधयतीति भावः, तदाह - यस्मै त्वं यतसे बिभेषि च यतो यत्रानिशं मोदसे, यद्यदिच्छसि यच्च शोचसि हृदा यत् प्राप्य प्रेपीयसे । स्निग्धो येषु निजस्वभावममलं निर्लोठ्य लालप्यसे, सर्वं तत् परकीयमेव भगवन् ! आत्मन् न किञ्चित्तव - इति **(शान्तसुधारसे ५-३)** ।

यच्च ते स्वरूपम्, तत्र केनापि कोऽपि विकार आपादयितुमशक्यः, अतस्तत्प्रत्ययिकमपि रुदनमसङ्गतमित्याह - **कि**मित्यादि । अत एवावस्थान्तराणामपि त्वय्यभाव इत्याह - **किमि**त्यादि ।

अतो मुच्यतामेतद्रुदनम्, परिशीलनीयमेतावदेव - **ज्ञानामृतं समरसं गगनोपमोऽहम्** - इति । अत्र ज्ञानामृतत्वाज्जडपर्याये स्वरूपभावाभावः, यथोक्तम् - पुद्गलानां गुणो मूर्त्ति - रात्मा ज्ञानगुणः पुनः । पुद्गलेभ्यस्ततो भिन्न - मात्मद्रव्यं जगुर्जिनाः।। धर्मस्य गतिहेतुत्वं गुणो ज्ञानं तथात्मनः । धर्मास्तिकायात्तद्भिन्न - मात्मद्रव्यं जगुर्जिनाः ।। अधर्मः स्थितिहेतुत्वगुणो ज्ञानगुणोऽसुमान्। ततोऽधर्मास्तिकायान्य - मात्मद्रव्यं जगुर्जिनाः ।। अवगाहो गुणो व्योम्नो ज्ञानं खल्वात्मनो गुणः । व्योमास्तिकायात्तद् भिन्न - मात्मद्रव्यं जगुर्जिनाः ।। आत्मा ज्ञानगुणः सिद्धः । समयो वर्तनागुणः । तद् भिन्नं समयद्रव्यादात्मद्रव्यं जगुर्जिनाः - इति **(अध्यात्मसारे १८/ ४८-५२)** ।

तथा समरसात्मकत्वाद् विरूपविरहः । गगनोपमत्वाच्च वयोऽन्तराभाव इति । एवं परमार्थतो रुदनहेत्वभावेऽपि यद्रुदनम्, तन्मोहमहिमविलसितम्, सोऽपि वस्तुतः शुद्धात्मनो नास्तीत्याह-

**यदि मोहविषादविहीनपरो,**

**यदि संशयशोकविहीनपरः ।**

**यदि चैकनिरन्तरसर्वशिव-**

**महमेति ममेति कथं च पुनः ।।६-१७।।**

**मोहः** - अतत्तद्दर्शनफलं तद्धेतुश्च विभावविशेषः, अत एवाहुः - चिंतेज्जा मोहम्मि ओहेणं ताव वत्थुणो तत्तं । उप्पाय-वय-धुवजुयं अणुहवजुत्तीए सम्मं ति-इति **(योगशतके ७१)**। तज्जन्यो **विषादः** - शशशृङ्गधनुर्मुक्तशिलीमुखसंवेधनिबन्धनमरणचिन्तोपमः शोकः, तेन **विहीनः** - मिहिलाए डज्झमाणीए न मे डज्झइ किंचणं - **(उत्तराध्ययने ९-१४)** इत्याद्यागमावगमानुभावोद्भूतविवेक-तस्तद्रहित आत्मपरिणामः, **यदि** तस्मिन् त्वं **परः** - परायणः, स्वप्नावस्थायामप्यनिवृत्ततद्भाव इत्याशयः ।

**यदि च संशयः** - उताहं मोहानुगतं द्रव्यं शुद्धज्ञानानुगमालङ्कृततया तत्प्रतिच्छायातोऽपि रहितं वेत्याद्यात्मकः सन्देहः, तस्मिन्नप्यसत्सम्भावनप्रयुक्तः **शोकः** - कूर्मरोमविनिर्मितरज्जूदंश-प्रयुक्तविषप्रसरहेतुकात्ममरणविषादानुकारि परिदेवनम्, तेन **विहीनः** - एकत्वैकनिभालनहेतुकतच्छून्यताविशिष्ट आत्मपरिणामः, उक्तञ्च - को मोहः कः शोक एकत्वमनुपश्यतः - इति **(ईशावास्योपनिषदि ७)** । तस्मिन् **परः** - परमोपादेयबुद्ध्या निमग्नः, सा चेयम् -

जीवादिबहितच्चं हेयमुवादेयमप्पणो अप्पा । कम्मोपाधिसमुब्भव-गुणपज्जाएहिं वदिरिक्तो - इति **(नियमसारे ३८)** ।

**यदि चैकनिरन्तरसर्वशिवम्** - चेदविशिष्टाव्यवच्छिन्नाशेषात्मा-नुयायिपरमात्मद्रव्यम्, यथोक्तमन्यत्र प्रकारान्तरतः - आत्मा विष्णुः समस्तानां वासुदेवो जगत्पतिः - इति ।

एवं स्थिते **अहमे(मि)ति ममेति च कथं पुनः** सम्भवतः ? मोहमात्रालम्बनत्वादहङ्कारममकारयोर्नैव तदभावे तौ भवितुमर्हतः, सद्धेतौ व्यतिरेकव्यभिचारायोगाद्धेतुफलव्यवस्थाविप्लवप्रसक्तेश्च, तदुक्तम् - नाकारणं भवेत्कार्यं नान्यकारणकारणम् । अन्यथा न व्यवस्था स्यात्कार्यकारणयोः क्वचित् - इति ।

ननु पदार्थान्तरोपलब्धेरभिहितशिवनैरन्तर्यासिद्धिरिति चेत् ? अत्रोत्तरयति -

**इन्द्रजालमिदं सर्वं, यथा मरुमरीचिका ।**
**अखण्डितमनाकारो, वर्तते केवलः शिवः ।।७-१३।।**

**इदम्** - अविद्यानुभावेन परमार्थसत्तयोपलभ्यमानं जगत्, **सर्वम्** - निःशेषम्, **इन्द्रजालम्** - अबुधैरवितथबुद्ध्येक्ष्यमाणं मायातन्त्रम्, जगति तद्व्यपदेशस्तत्प्रायत्वात्तस्य, इन्द्रजाले हि पश्चात्कालेऽनुपलम्भ एव सुरलोकादिदर्शनमिथ्यात्वबीजम्, स च विश्वेऽपि विश्वेऽविशिष्टः क्षणदृष्टनष्टस्थितिकस्यास्यानुभवसिद्धत्वात्, उक्तञ्च - माइंदजालचवला विसया जीवाण विज्जुतेअसमा ।

खणदिट्ठा खणनट्ठा ता तेसु को हु पडिबंधो ? - इति (इन्द्रियपराजयशतके-८६) । अत्र निदर्शनमाह - **यथा मरुमरीचिका**, सा यथोपलभ्यमानाऽपि वस्तुतो नास्ति, तथा जगदपि, उक्तहेतोः।

अत्र निदर्शनान्तराणि - इन्द्रजालमिव मायामयम्, स्वप्न इव मिथ्यादर्शनम्, कदलीगर्भ इवासारम्, नट इव क्षणवेशम्, चित्रभित्तिरिव मिथ्यामनोरमम् - इति (मैत्राण्युपनिषदि ४-२) ।

शून्यवादप्रसक्तिरेवमिति चेत् ? न, आपेक्षिकत्वात्, अपेक्षायाश्चादावेव प्रदर्शितत्वात्, प्रतिबन्धापगमप्रयोजनतः प्रकृतापेक्षासार्थक्यात्, अत एव पारमर्षेऽपि-विवरीओ य संसारो इमेहिं अणवट्ठियसहावो, इत्थ खलु सुही वि असुही, संतमसंतं, सुविणु व्व सव्वमालमालं ति । ता अलमित्थ पडिबंधेण । उज्जमह एयवुच्छिंदित्तए - इति (पञ्चसूत्रे ३) । सोऽयं सर्वसत्त्वहितैकहेतुः स्याद्वादसुधारसप्रसरो नानुप्रविशति शून्यवादे, ज्ञापकञ्चात्रैतद्-व्युच्छेदोपदेशवचनमित्यन्यत्र विस्तरः । (दृश्यतां ज्ञानोपनिषन्याविशारदं च)

इतश्च शून्यवादानवकाश इत्याह - **अखण्डित**मित्यादि । उक्तार्थम् । एतदेव प्रकारान्तरतः प्रस्तौति -

**त्वद्यात्रया व्यापकता हता ते,**
**ध्यानेन चेतःपरता हता ते ।**
**स्तुत्या मया वाक्परता हता ते,**
**क्षमस्व नित्यं त्रिविधापराधान् ।।८-१।।**

**त्वदित्यादि** । त्वद्यात्रैवास्माकं प्रतिजीवं त्वदस्तित्वानास्थाज्ञापिकेति भावः । **ध्यानेने**त्यादि, किलायं मन्मनोगोचर इत्येतदभिसन्धायैव प्रवर्तते ध्यानाभियोगः, स च त्वच्चिन्तातीतस्वरूपापत्त्नवमन्तरेण दुर्घट इति हृदयम् । **स्तुत्ये**त्यादि । सद्भूतगुणवर्णना हि स्तुतिः, मद्वचोविषय एव त्वमित्यव्यक्ताभिमानत एव प्रतितिष्ठते स्तुतिरित्याशयः । एवं त्वद्भक्तित्वेनाभिमता अपि त्वद्यात्रादयः परमार्थतस्त्वदपराधा इत्याह - **क्षमस्वे**त्यादि ।

नन्वेवं यात्रादिकमकर्तव्यमापन्नमिति चेत् ? न, जीवमात्रविषयकशिवदर्शनकर्त्तव्यतादावेव तात्पर्यभावात्, आदिनाऽवाङ्मनसगोचरत्वादिप्राभवप्रभावप्रतिपत्तिग्रहः । तत्र च पारम्पर्येण यात्राद्यपि कारणमित्यालोचनीयं पटुप्रतिभया ।

एतत् सर्वमपि धर्मानुष्ठानं भावश्रामण्यसम्पादनेन परमपदसाधकं भवति, अतः भावश्रामण्यमेव तद्वद्वर्णनेन वर्णयति -

**कामैरहतधीर्दान्तो, मृदुः शुचिरकिञ्चनः ।**
**अनीहो मितभुक् शान्तः, स्थिरो मच्छरणो मुनिः ॥८-२॥**

**कामैः** - सल्लं कामा विसं कामा कामा आसीविसोवमा । कामे य पत्थेमाणा अकामा जंति दुग्गइं - **(उत्तराध्ययने ९-५३)** - इत्यागमाविष्कृतस्वरूपैः शब्दादिविषयैः, **अहतधीः** - कामाणुगिद्धिप्पभवं खु दुक्खं - **(उत्तराध्ययने ३२-१९)** - इतिपारमर्षपरिणतिप्रभावादविकृतविवेकमतिः ।

अत एव **दान्तः** - प्रत्याहृतपञ्चेन्द्रियः, अत एव **मृदुः** - सर्वसत्त्वकृपातिशयालङ्कृततया नवनीतसुकोमलान्तःकरणः, अजितेन्द्रियस्य तदसम्भवात्, विषयरागाहिंसयोः व्यधिकरणत्वात्, ज्ञापकञ्चात्र - नानुपहत्य भूतानि भोगः सम्भवति - इति **(योगदृष्टिसमुच्चये ।।१५९।। वृत्तावृद्धरणम्)** ।

अत एव **शुचिः** - कारुण्यपुण्यः, अत एवा**किञ्चनः** - धर्मोपकरणातिरिक्तवस्त्वभाववान्, विपक्षे हिंसादिध्रौव्यात्कारुण्यक्षतेः, अत **एवानीहः** - स्वभावलाभाविषयकस्पृहारहितः, न चात्राकिञ्च-न्यमप्रयोजकमिति वाच्यम्, पारमर्षप्रामाण्यात्तद्भावाभ्युपगमादनु-भवसिद्धत्वाच्च, तदुक्तम् - लोहो हओ जस्स न किंचणाइं - इति **(उत्तराध्ययने ३२-८)** ।

अत एव **मितभुक्** - संयमयात्रामात्राशनः, तदतिक्रम-स्येहाफलत्वात् । अत एव **शान्तः - द्रव्यभावामयसन्तापोपशमात्**, यदार्षम् - हियाहारा मियाहारा, अप्पाहारा य जे नरा । न ते विज्जा तिगिच्छंति, अप्पाणं ते तिगिच्छगा - इति **(पिण्डनिर्युक्तौ ६४८, ओघनिर्युक्तौ ५७८)** । भावरोगापगमस्तु स्पृहासंहतेः सिद्ध एव, उक्तञ्च - आशापत्नीं त्यजेद्यावत्तावन्मुक्तो न संशयः - इति **(मैत्रेय्युपनिषदि २-१२)** ।

अत एव **स्थिरः**, प्रधावनप्रयोजकापगमात्, तदाह - आशा नाम मनुष्याणां काचिदाश्चर्यशृङ्खला । यया बद्धाः प्रधावन्ति मुक्तास्तिष्ठति पङ्गुवत् - इति ।

अहम् - परमात्ममात्रम्, शरणं यस्य सः - **मच्छरणः** - सर्वात्मना भगवत्प्रवचनानुगन्ता, कोऽसावित्याह - **मुनिः** - भावश्रामण्यशाली । तमेव लक्षणान्तरैर्लक्षयति -

**अप्रमत्तो गभीरात्मा, धृतिमान् जितषड्गुणः ।**
**अमानी मानदः कल्पो, मैत्रः कारुणिकः कविः ॥८-३॥**

**अप्रमत्तः** - प्रमादं वै मृत्युमहं ब्रवीमि, तथाप्रमादममृतत्वं ब्रवीमि - **(महाभारत उद्योगपर्वणि ४२-४)** इत्यादिवचःस्पर्शापगतप्रमादः। तमेव विशेषयति - **गभीरात्मा** - हर्षादिनिमित्त-योगेऽप्यमुक्त-स्तिमितोदध्यौपम्यः । तमेव विशेषयति - **धृतिमान्** - व्यसनाशनि-सन्निपातेऽप्यविचलितप्रकृतिः, जो सहइ हु गामकंटए अक्कोसपहार-तज्जणाओ य । भयभेरवसद्दसप्पहासे समसुहदुक्खसहे य जे स भिक्खू - **(दशवैकालिके १०-११)** इत्यार्षैकात्म्यफलमिदमिति तद्विदः।

तमेव विशेषयति - **जितषड्गुणः** - कामादिनिराकर्ता । तथा**ऽमानी** - बोधातिशयसम्पन्नतया निरहङ्कारः, तदुक्तम् - अहम्भावोदयाभावो बोधस्य परमावधिः - इति । तथा **मानदः** - चेतनाचेतनेषु सर्वत्रोचितविनयविधाता, तथा **कल्पः** - प्रतिज्ञात-प्रतिनिर्वाहसामर्थ्यसम्पन्नः, अनीदृशस्य प्रत्युतापारपारावारपातसम्भवात्, यथोक्तम् - हीनसत्त्वो यतो जन्तु - र्बाधितो विषयादिभिः । बाढं पतति संसारे, स्वप्रतिज्ञाविलोपनात् - इति **(योगसारे ४-२)** ।

तथा **मैत्रः** - प्रत्युपकारनिरपेक्षप्रीत्या विश्वविश्वहितः, तमेव विशेषयति - **कारुणिकः** - परदुःखजिहीर्षाभावितहृदयः, तमेव विशेषयति - **कविः** - तत्त्वप्ररूपकः, कवते कौति वा तत्त्वम् - कविरितिनिरुक्तेः । किञ्चासौ -

**कृपालुरकृतद्रोहस्तितिक्षुः सर्वदेहिनाम् ।**
**सत्यसारोऽनवद्यात्मा, समः सर्वोपकारकः ।।८-४।।**

**कृपालुः** - निष्कारणवत्सलः, **अकृतद्रोहः** - प्रशमप्रकर्षादपकारिण्यप्यविहितविरूपविमर्शादिः । तथा **सर्वदेहिनां तितिक्षुः** - साहु सहइ सव्वं नीयाण वि पेसपेसाणं - **(उपदेशमालायाम्)** इत्यार्षभावनाज्ञानभावितान्तरात्मा, **सत्यसारः** - सर्वसत्त्वहिताशयप्रधानः, सद्भ्यो हितं सत्यमित्युक्तेः, **अनवद्यात्मा** - पारमर्षपरिणतिप्रभावेण प्राणान्तेऽपि निष्पापवृत्तिः, उक्तञ्च - सिद्धंतगयमेगं पि अक्खरं जो वियाणइ । सो गोयम ! मरणंते वि अणायारं न आयरे - इति **(महानिशीथे)** ।

तथा **समः** - परप्रवृत्तौ बधिरान्धमूकत्वेन स्वप्रवृत्तौ च वैषम्यालम्बनानुपलब्धेः सर्वथाऽप्यस्खलितसाम्यसञ्चारः, यथाभिहितम् - आत्मप्रवृत्तावतिजागरूकः, परप्रवृत्तौ बधिरान्धमूकः । सदा चिदानन्दपदोपयोगी लोकोत्तरं साम्यमुपैति योगी - इति **(अध्यात्मोपनिषदि ४-२)** । तथा **सर्वोपकारकः** - षट्कायदयाप्रवृत्तत्वात्, स्वविद्यमानतादेरपि परार्थकारित्वाच्च, अत एवोक्तम् - विहितानुष्ठान-

परस्य तत्त्वतो योगशुद्धिसचिवस्य । भिक्षाटनादि सर्वं परार्थकरणं यतेर्ज्ञेयम् - इति **(षोडशके १३-५)** ।

सोऽयं भावश्रामण्यशाल्येवावधूत उच्यत इति तन्निरुक्तिप्रभव-लक्षणान्यभिधातुमुपन्यासमाह -

**अवधूतलक्षणं वर्णैर्ज्ञातव्यं भगवत्तमैः ।**
**वेदवर्णार्थतत्त्वज्ञैर्वेदवेदान्तवादिभिः ।।८-५।।**

**भगवत्तमैः** - तत्त्वजिज्ञासात्मकैश्वर्यशालिशेखरैः, **वेदवर्णार्थ-तत्त्वज्ञैः** - सिद्धान्ताक्षरतात्पर्यभावविद्भिः, **वेदवेदान्तवादिभिः** - सिद्धान्तं तत्प्रतिपादितमन्तम् - निश्चयमेव तत्त्वत्वेनोचानैः, **वर्णैः** - अन्तर्गताक्षरैः, **अवधूतलक्षणं** वक्ष्यमाणप्रकारेण **ज्ञातव्यम्** - तत्तल्लक्षणावाप्तिर्यथा स्यात्तथाऽवगन्तव्यम्, तस्या अभावे ज्ञानानुपपत्तेः, स्वजन्यमजनयतस्तत्त्वतोऽसत्त्वात् ।

आद्याक्षरमधिकृत्याह -

**आशापाशविनिर्मुक्त, आदिमध्यान्तनिर्मलः ।**
**आनन्दे वर्तते नित्यमकारं तस्य लक्षणम् ।।८-६।।**

**आशापाशविनिर्मुक्तः**-आशादासस्तु यो जातो, दासस्त्रिभुवनस्य सः । आशादासीकृता येन, तस्य दास्ये जगत्त्रयी - इतिनीतिनिपुणतया नितरां निराशः । तथा**ऽऽदिमध्यान्तनिर्मलः** - सर्वतोऽपि कालुष्य-शून्यान्तःकरणः, आज्ञा तु निर्मलं चित्तं कर्त्तव्यं स्फटिकोपमम् -

**(योगसारे १-२१)** इतिभगवदाज्ञापरिपालक इत्यर्थः । तथा यो **नित्यम्** - परीषहोपसर्गसङ्घातोपनिपातसमयेऽपि, **आनन्दे** - स्वभावसुधा-सागर-सन्निमज्जनसम्भूतप्रीतिप्रकर्षे, **वर्तते** - भावसामग्र्येण तिष्ठति, **तस्याकारं लक्षणम्,** प्रथममवधूतलिङ्गमकारसञ्ज्ञकमनन्तरव्याख्यातं तेनाधिगतमित्यर्थः । द्वितीयमाह -

**वासना वर्जिता येन, वक्तव्यं च निरामयम् ।**
**वर्तमानेषु वर्तेत, वकारं तस्य लक्षणम् ।।८-७।।**

**येन** - महात्मना, **वासना** - अतत्तदभिमानात्मिका कलुषित-चित्तवृत्तिः, **वर्जिता**-दुर्गतिहेतुतया परिज्ञाय सत्सङ्गादियोगेन प्रत्याख्याता, यथोक्तम्-अवेद्यसंवेद्यपदमान्ध्यं दुर्गतिपातकृत् । सत्स-ङ्गागमयोगेन जेयमेतन्महात्मभिः - इति **(योगदृष्टिसमुच्चये ८६)**।

यस्य **च वक्तव्यम्** - कार्यवशाद् भाषितव्यम्, **निरामयम्** - अणुवीइ निट्ठाभासी निसम्मभासी अतुरियभासी विवेगभासी समियाए संजए भासं भासिज्जा **(आचाराङ्गे २-१-४-१)** इत्यागमावग-मानुभावापास्तदोषम् ।

किञ्च यो **वर्तमानेष्वेव वर्तेत**, भूताद्यध्वानुस्मरणादिकं न कुर्यादित्यर्थः, यथोक्तम् - अनुस्मरति नातीतं नैव काङ्क्षत्यनागतम् - इति **(अध्यात्मसारे १५-४८)** । **तस्य** - वासनावर्जनादिविशिष्टस्य, **वकारं लक्षणम्,** अवाप्तमनेनावधूतापरलिङ्गमित्याशयः । तृतीयमाह-

**धूलिधूसरगात्राणि, धूतचित्तो निरामयः ।**
**धारणाध्याननिर्मुक्तो, धूकारस्तस्य लक्षणम् ।।८-८।।**

यस्य तु **धूलिधूसरगात्राणि**, किलिन्नगाए मेहावी, पंकेण व रएण वा । थिंसु वा परियावेण, सायं नो परिदेवए ।। वेएज्ज निज्जरापेही, आरियं धम्ममणुत्तरं । जाव सरीरभेउ त्ति, जल्लं काएण धारए - **(उत्तराध्ययने ८४-८५)** इतिभगवदुपदेशादरतो निष्परिकर्मकलेवर इति हृदयम् ।

किञ्च यो **धूतचित्तः** - परपरिणामविरहतो विकल्पविसररहितः, यथोक्तम् - जलहिम्मि असंखोभे पवणाभावे जह जलतरंगा । परपरिणामाभावे णेव वियप्पा तया हुंति ।। का अरती आणंदे के व त्ति वियप्पणं न जत्थुत्तं । अण्णे तत्थ वियप्पा पुग्गलसंजोगजा कत्तो ? - इति **(धर्मपरीक्षायाम् ९७-९८)** ।

तथा यो **निरामयः** - अपगतप्रायभवरोगः, जीवन्मुक्त इत्यर्थः, तदुक्तम् - क्षीणव्याधिर्यथा लोके व्याधिमुक्त इति स्थितः । भवरोग्येव तु तथा मुक्तस्तन्त्रेषु तत्क्षयात् - इति **(योगदृष्टिसमुच्चये २०६)** ।

तमेव विशेषयति - धारणा**ध्याननिर्मुक्तः** - निरन्तरमुत्तर-दशाव्यवस्थितेश्चित्तनिश्चलभावाद्यधस्तनावस्थातीतः, ध्येयमात्रगोचर-समाधिसमलङ्कृत इत्याशयः, तदाह - ध्यातृध्याने परित्यज्य क्रमाद् ध्येयैकगोचरम् । निर्वातदीपवच्चित्तं समाधिरभिधीयते - इति **(रामगीतायाम् ८-३२)** ।

**तस्य** - अपरिकर्मितादिलोकोत्तरविभूषाविभूषितस्य, **धूकारो लक्षणम्**, तृतीयमवधूतचिह्नमनेनात्मसात्कृतमित्यभिप्रायः । तुर्यमाह-

**तत्त्वचिन्ता धृता येन, चिन्ताचेष्टाविवर्जितः ।**
**तमोहङ्कारनिर्मुक्तस्तकारस्तस्य लक्षणम् ।।८-९।।**

**येन** योगिना **तत्त्वचिन्ता धृता**, स्वरूपसंवेदनाभिधोत्तमाध्वोरीकृत इति हृदयम्, उक्तञ्च-उत्तमा तत्त्वचिन्तैव, मध्यमं शास्त्रचिन्तनम्। अधमा मन्त्रचिन्ता च, तीर्थभ्रान्त्यधमाधमा - इति (**मैत्रेय्युपनिषदि २-२**) ।

तथा **चिन्ताचेष्टाविवर्जितः** - तत्त्वचिन्तनभगवदाज्ञानुपालनातिरिक्तमनोवाक्कायप्रवृत्तिरहितः, अत एव **तमोऽहङ्कारनिर्मुक्तः** - अज्ञानजन्यदर्पलेशेनाप्यकलङ्कितः, तत्त्वचिन्तादेस्तन्मूलोन्मूलनात्। **तस्य** - चिच्चिन्तामणिमात्रपरिनिष्ठितस्य, **तकारो लक्षणम्**, अन्त्यमवधूताभिज्ञानमङ्गीकृतमनेनेत्याकूतम् ।

उपलक्षणमेतत्, तेनान्यान्यपि तल्लक्षणानि यथायोगमवगन्तव्यानि, यथोक्तम् - अक्षरत्वाद् वरेण्यत्वाद्, धूतसंसारबन्धनात् । तत्त्वमस्यर्थसिद्धत्वाद्, अवधूतोऽभिधीयते ।। यो विलङ्घ्याश्रमान्वर्णानात्मन्येव स्थितः पुमान् । अतिवर्णाश्रमी योग अवधूतः स उच्यते - इति (**अवधूतोपनिषदि १, २**) ।

सर्वोऽप्ययं योगमार्गो भोगमार्गपरिवर्जनमन्तरेणाप्राप्यः, स च स्त्रीप्रधान इति तद्विषयामेव विरक्तिमुत्पादयति, प्रतिबन्धकाभावस्यापि कथञ्चित्सहकारित्वानतिक्रमादिति ।

**मनसा कर्मणा वाचा, त्यज्यतां मृगलोचना ।**
**न ते स्वर्गोऽपवर्गो वा, सानन्दं हृदयं यदि ।।८-११।।**

**यदि** ते **हृदयं** स्त्रियं प्रति **सानन्दम्**, तद्विलासादिविलोकनादिसञ्जातप्रीतिकम्, तदा **न ते स्वर्गोऽपवर्गो वा,** इदृशस्यानिशमबलैकाध्यवसिततया धर्मरत्यसम्भवात्, धर्ममन्तरेण स्वर्गाद्यनवाप्तेश्च, उक्तञ्च - रात्रौ दिवा च सा सा सा, सर्वं सर्वत्र सैव हि । एवं स्त्र्यासक्तचित्तानां क्व धर्मकरणे रतिः ? - इति **(योगसारे ४-१३)** । ननु च मा भूद्धर्मः, भवतां स्वर्गापवर्गौ, को दोष इति चेत् ? हेतुफलभावव्यवस्थाविप्लवप्रसक्तिरिति गृहाण, सा चानिष्टा सर्ववादिनाम्, तद्भावसिद्धिरपि प्रकृते - विशिष्टं देवसौख्यं यत्, शिवसौख्यं च यत् परम् । धर्मकल्पद्रुमस्येदं, फलमाहुर्मनीषिणः - इति **(धर्मबिन्दौ ३९)** ।

यत एवम्, अतो **मनसा कर्मणा वाचा** च **मृगलोचना -** सचित्तादिभेदभिन्ना नारी, **त्यज्यताम् -** इत्थी विप्पजहे अणगारे - **(उत्तराध्ययने ८-१९)** इतिपारमर्षपरिचिन्तनपरिणामात्मकं हानं विधीयताम् । किञ्च -

**न जानामि कथं तेन, निर्मिता मृगलोचना ।**
**विश्वासघातकीं विद्धि, स्वर्गमोक्षसुखार्गलाम् ॥८-१२॥**

**तेन -** विधातृत्वेन परैरभ्युपगतेन नियत्यादिकारणसमुदायेन,

**कथं मृगलोचना निर्मिता ?** इति **न जानामि**, विश्वविश्वविषय-दारुणक्रूरभावमन्तरेणेदृशनिर्माणमेव न घटाकोटिमाटीकत इत्याकूतम्, अत एवाहुः - सम्पिण्ड्येवाहिदंष्ट्राग्नि - यमजिह्वाविषाङ्कुरान्। जगज्जिघांसुना नार्य्यः, कृता क्रूरेण वेधसा - इति **(योगशास्त्रे ३५३)** । किमासु नाम विरूमित्यत्राह - **विश्वासघातकीम् -** विश्रब्धवञ्चनद्वारेण स्वविषयप्रत्ययप्रतिघातपराम्, अत एव नीतिज्ञाः - मरणान्तः स्त्रीषु विश्वासः - इति **(नीतिवाक्यामृते ३-४५)** । अत एवार्षमपि - मा वीसंभह ताणं महिलाहिययाण कवडभरियाणं। णिण्णेहणिद्दयाणं अलियवयणजंपणरयाणं - इति **(स्त्रीवास्तविकता-प्रकरणे ७)** ।

सुप्रसिद्धश्च स्त्रीकृतविश्वासघातः साकेतराज्ञीप्रभृतिज्ञातेषु, तथा चोक्तम् - साकेतपुराहिवई देवरई रज्जसोक्खपब्भट्ठो । पंगुलहेउं छूढो नईइ रत्ताइ देवीए ।। वीरमईए सूरंगचोरदट्ठोट्ठियाइ वाणियओ। दत्तो नाम पहओ छिण्णो ओट्ठो त्ति आलविए - इति **(आराधना-पताकायाम् ५७५, ५७६)** ।

तथा **स्वर्गमोक्षसुखार्गलाम् -** सुरसिद्धसम्बन्धिसुखसम्प्राप्ति-प्रतिबन्धिकाम्, उक्तञ्च - मूलं दुच्चरियाणं हवइ उ णरयस्स वत्तणी विउला । मोक्खस्स महाविग्घं वज्जेयव्वा सया नारी - इति **(स्त्रीवास्तविकताप्रकरणे १४)** । एवंरूपां स्त्रियं **विद्धि -** श्रुतचक्षुषाऽवगच्छ, विषाऽऽस्वादतस्तत्परीक्षणस्य मरणकारणत्वादिति । किञ्च-

**मनःसन्तापजननीं, मोक्षमार्गविरोधिनीम् ।**
**निष्ठुरां मलिनां नारीं, त्यक्त्वा नित्यं सुखी भव ॥८-१३ ॥**

**मनःसन्तापजननीम्** - शोकादिनिबन्धनतया चित्तानुशयाग्न्यरणिम्, यदार्षम् - सोअसरी दुरिअदरी कवडकुडी महिलिया किलेसकरी । वइरविरोयणअरणी दुक्खखणी सुक्खपडिवक्खा - इति **(इन्द्रियपराजयशतके ३८)** ।

तथा **मोक्षमार्गविरोधिनीम्** - सिद्धिसञ्चरपरमप्रतिपक्षरूपा, न हि तादृगन्यत्किमपि मुमुक्षूणामवरोधकम्, यादृशी नारी, प्रमाणं चात्र पारमर्षम् - मोक्खाभिकंखिस्स वि माणवस्स, संसारभीरुस्स ठियस्स धम्मे । नेयारिसं दुत्तरमत्थि किंचि, जहित्थिओ बालमणोरमाओ - इति **(उत्तराध्ययने ३२-१७)** ।

तथा **निष्ठुराम्** - क्रूराशयाम्, यतः - सुट्ठु वि जियासु सुट्ठु वि पियासु सुट्ठु वि परूढपेम्मासु । महिलासु भुयंगीसु व वीसंभं नाम को कुणइ ? ।। वीसंभनिब्भरं पि हु उवयारपरं परूढपणयं पि । कय विप्पियं पियं झत्ति निंति निहणं हयासाओ - इति **(आराधनापताकायाम् ५६९, ५७०)** ।

तथा **मलिनाम्** - द्रव्यभावाशुचिबीभत्साम्, तत्र प्रथमं द्रव्याशुचिर्यथा - असुइमुत्तमलपवाहरूवयं वंतपित्तवसमज्जफोफसं। मेयमंसबहुहड्डकरंडयं चम्ममित्तपच्छाइयं जुवइअंगयं ।। मंसं इमं मुत्तपुरिसमीसं, सिंघाणखेलाइअनिज्झरंतं । एअं अणिच्चं किमिआण

वासं, पासं नराणं मइबाहिराणं - इति **(इन्द्रियपराजयशतके ५०, ५१)**। अन्यत्रापि-किमिणो व्व वणो किमिकुलसएहिं सइ संकुलं सरीरमिणं । इक्कंपि नत्थि अंगं पूयं सुइयं च जं हुज्जा ।। सव्वुक्कत्तियचम्मं पंडरगत्तं मुयंतवणरसियं । सुट्ठु वि दइयं महिला दट्ठुंपि नरं न रोएइ ।। जइ हुज्ज मच्छियापत्तसरिसियाइ तयाइ नो नद्धं । को नाम कुणिमभरियं सरीरमालद्धुमिच्छिज्ज?।। कण्णेसु कण्णगूहो जायइ अच्छीसु अच्छिदूसीओ । नासागूहो नासाउडेसु वयणे य दंतमलो ।। विट्ठापुण्णो भिण्णो घडो व्व असुइं समंतओ गलइ । पूइंगालो व वणो मुंचइ दुग्गंधगंधवहं।। असुइवणपूइगंधं सेवंता महिलियाइ कुणिमकुडिं । सोआहिमाणिणो जे ते लोए हुंति हसणिज्जा - इति **(आराधनापताकायाम् ६१०-६१४, ६२३)**

अत एवाहुः परेऽपि - दुर्गन्धे चर्मगर्ते व्रणमुखशिखरे मूत्ररेतःप्रवाहे, मांसासृक्कर्दमार्द्रे कृमिकुलकलिते दुर्गमे दुर्निरीक्षे। विष्टाद्वारोपकण्ठे गुदविवरगलद्वायुधूमार्तधूपे कामान्धः कामिनीनां कटितटनिकटे गर्दभत्युत्थमोहात् - इति **(कार्तिकेयानुप्रेक्षावृत्तौ)** । पुरिसे कामरागपडिबद्धे नाणाविहेहिं उवायसयसहस्सेहिं वहबंधण-माणयंति पुरिसाणं नो अन्नो एरिसो अरी अत्थि त्ति नारीओ - **(तन्दूलवैचारिकप्रकीर्णके १५७)** इत्यागमोदितान्वर्था - **नारी** - महिला, तां **त्यक्त्वा नित्यं सुखी भव**, स्त्रीत्याग-संसारत्यागनित्य-सुखाधिगमानां पर्यायाभिधानत्वात्, तदुक्तम् - स्त्रियं त्यक्त्वा जगत्

त्यक्तं, जगत् त्यक्त्वा सुखी भवेत् - इति **(महोपनिषदि ३-४८)** । किञ्च-

**कौटिल्यदम्भसंयुक्ता, सत्यशौचविवर्जिता ।**
**केनापि निर्मिता नारी, बन्धनं सर्वदेहिनाम् ॥८-१४॥**

